**संस्कृतवार्ताः**

**दिनाङ्क : 26/02/2026**

**सायम् - 06:20**

**इयम् आकाशवाणी**
**सम्प्रति: वार्ताः श्रूयन्ताम्**
**प्रवाचकः - ललितमोहनतिवारी**

-

## आदौ मुख्यवार्ताः

- भारतइज्रैलदेशाभ्यां सांस्कृतिक-आदानप्रदानम्, भू-भौतिकीय-अन्वेषणम्, मत्स्यपालनम्, यूपीआई-प्रणालीम्, एआई-समर्थित-शिक्षा च सम्बद्धानि महत्वपूर्णानि सन्धिपत्राणि हस्ताक्षरितानि।
- प्रधानमन्त्री नरेन्द्रमोदी यरुशलम-नगरे स्वकीयेन इजरायली-समकक्षीयेण बेंजामिन-नेतन्याहू इत्यनेन सह प्रतिनिधिमण्डल-स्तरीय-वार्तां कृतवान्। प्रधानमन्त्री उक्तवान् यत् भारत-इजराइल-सम्बन्धाः विश्वासे, लोकतान्त्रिक-मूल्येषु तथा मानवीय-संवेदनशीलतायां आधारिताः सन्ति।
- निर्वाचन-आयोगेन दश-राज्येषु राज्यसभायाः सप्तत्रिंशत् स्थानानां कृते द्विवार्षिक-निर्वाचनस्य अधिसूचना प्रकाशिताऽस्ति।
- भारतदेशेन पाकिस्तानस्य दुष्प्रचारस्य दृढतया प्रत्युत्तरं प्रदत्तम्।
- आईसीसी विंशति-प्रति-विंशति-क्रिकेट-विश्वचषक-स्पर्धायाम् भारतदलम् अद्य सायं चेन्नई-नगरे जिम्बाब्वे-दलेन सह प्रतिस्पर्धिष्यति।

## अथ वार्ताः विस्तरेण

### भारत-इज्रैल-सन्धिः

भारत-इज्रैल-देशौ अद्य सांस्कृतिकम् आदानं प्रदानं, भू-भौतिकान्वेषणं, मत्स्यपालनं जलीयकृषिः, यूपीआई ,शिक्षायां कृत्रिमबुद्धिमत्तोपयोगः चेत्यादिभिः विषयैः सह विविधेषु क्षेत्रेषु सन्धिपत्राणाम् आदानं प्रदानं च कृतवन्तौ। सन्धिसहयोगज्ञापनेषु हस्ताक्षराणि प्रधानमन्त्रिणः नरेन्द्रमोदिनः तस्य इज्रैल-समकक्षीयस्य बेंजामिननेतन्याहू इत्यस्य च मध्ये प्रतिनिधिमण्डलस्तरीयायाः वार्तायाः अनन्तरं जातानि । पत्रकारसम्मेलने प्रदत्ते स्वकीये वक्तव्ये, श्रीमोदिना प्रोक्तं यत् भारत-इज्रैलदेशयोर्सबन्धाः सुदृढविश्वासस्य, परस्पर-लोकतांत्रिकमूल्यानां गभीरमानवीयसंवेदनशीलतायाः च सुदृढाधारस्तम्भेषु प्रतिष्ठापिताः सन्ति । सः अकथयत् एतत् मैत्रीबन्धनं, समयस्य परीक्षणमानदण्डे सिद्धिम् अवाप्नोत् । प्रधानमन्त्रिणा प्रोक्तं यत् अद्य द्वावेव पक्षौ चिर-परीक्षितसहयोगं विशिष्ट-रणनीतिक-सहयोगरूपेण अग्रे नेतुम् ऐतिहासिकं निर्णयं स्वीकृतवन्तौ।

सः प्रोक्तवान् यत् नववर्षाणि पूर्वं सः इज्रैलदेशस्य यात्रां कुर्वाणः प्रथमः भारतीयप्रधानमन्त्री भवितुं सौभाग्यम् अवाप्नोत्। श्रीमोदी अकथयत् यत् पुनरेकदा इज्रैलदेशस्य ऐतिहासिकभूमौ पदार्पणं तस्य कृते गौरवास्पदं भावनात्मकं च क्षणं वर्तते। सः प्रोक्तवान् यत् अद्य द्वावेव पक्षौ क्रिटिकल-एंड-इमर्जिंग-टेक्नोलॉजीज इत्यस्मिन् क्षेत्रे पारस्परिकसहयोगं स्थापयितुं निर्णयं स्वीकृतवन्तौ ।सः प्रोक्तवान् यत् इज्रैलदेशे यूपीआई इत्यस्य उपयोगाय एका सन्धि अपि जाता

श्रीनेतन्याहू अकथयत् यत् , इज़्रैल-भारतदेशौ प्राचीन-सभ्यतासु अतीते च गौरवम् अनुभवन्ति परञ्च भविष्यं वशीकर्तुं कृतसङ्कल्पौ स्तः।

**प्रधानमन्त्री-इन्स्टाग्राम्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना इन्स्टाग्राम् इत्यत्र दशकोटि-अनुयायिभिः सह ऐतिहासिकं सोपानम् आरुह्य, अस्मिन् सार्वजनिक-सञ्जालीय-प्रकल्पे एतत् कार्यं साधयतः प्रथमः विश्वनेता तथा राजनेतारः अभवत् । अवधेयं यत् प्रधानमन्त्री नरेन्द्रमोदी चतुर्दशोत्तरद्विसहस्रतमाब्दे इन्स्टाग्राम् इत्यत्र सम्मिलितः अभवत्। तस्य इन्स्टाग्राम्-तन्त्रांशे अमेरिकादेशस्य राष्ट्रपतिनः डोणाल्ड्-ट्रम्पः इत्यस्य अपेक्षया द्विगुणादधिकाः अनुयायिनः सन्ति। आगामि-पञ्च-प्रमुखविश्वनेतृणाम् अनुयायिनां कुलसङ्ख्या प्रधानमन्त्री-मोदी-वर्यस्य व्यक्तिगत-अनुयायिनां सङ्ख्यायाः अपेक्षया न्यूना अस्ति। । मोदीवर्यः इन्स्टाग्राम् इत्यत्र अन्येषां भारतीयराजनेतृणाम् अपेक्षया क्रोशान्तरालादग्रे अस्ति । द्वितीये स्थाने उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथः अस्ति, यस्य प्रायः एकषष्टि-लक्षाधिकैककोट्यनुयायिनः सन्ति ।

**निर्वाचनायोगः**

निर्वाचन-आयोगेन दशसु राज्येषु स्थितानां सप्तत्रिंशत् राज्यसभा-आसनानां कृते द्विवार्षिक-निर्वाचनस्य अधिसूचना प्रख्यापिता। नामाङ्कनपत्राणि अद्य आरभ्य मार्चमासस्य पञ्च-दिनांक-पर्यन्तं पूरयितुं शक्यन्ते। मतदानं आगामिमासस्य षोडशे दिनांके भविष्यति।

महाराष्ट्रे सप्त, तमिलनाडु-राज्ये षट्, बिहार-राज्ये पश्चिम-बङ्ग-राज्ये च पञ्च-पञ्च, ओडिशा-राज्ये चत्वारि, तेलङ्गाना-छत्तीसगढ-हरियाणा-राज्येषु द्वे-द्वे तथा हिमाचलप्रदेशे एकम् असम-राज्ये त्रीणि, आसनानि रिक्तानि सन्ति।

**भारत-सुरक्षापरिषत्**

जिनेवानगरे फरवरीमासस्य त्रयोविंशति-दिनाङ्कतः मार्चमासस्य एकत्रिंशद्दिनाङ्कं यावत् आयोजिते संयुक्तराष्ट्रसङ्घस्य मानवधिकारपरिषदः एकषष्टितमे सत्रे भारतं पाकिस्तानं प्रति तीक्ष्णं प्रत्याख्यानम् अकरोत् । भारतम् इस्लामाबादं प्रति आरोपान् प्राख्यापितानकरोत् यत् एषः पाकिस्तानस्य कुप्रचारः अस्ति यत् जम्मू-कश्मीरस्य विकासमार्गः पाकिस्तानस्य आर्थिकसमस्याभ्यः उत्तरदायी अस्ति ।ह्यः आयोजिते उच्च-स्तरीये उपवेशने, भारतस्य प्रतिनिधिरूपेण अनुपमा-सिंहः इत्येषा, पाकिस्तानस्य इस्लामिक-सहयोग-सङ्घटनस्य च प्रख्यापितारोपान् निराकर्तुं संयुक्तराष्ट्रस्य उत्तर-प्रदानाधिकारस्य प्रयोगम् अकरोत्। श्रीमती सिंह-वर्या भारतस्य दीर्घकालीनस्थितिं पुनरुच्चारितवती यत् जम्मू-कश्मीरः भारतस्य अभिन्नः अविभाज्यः च भागः आसीत्, अस्ति, भविष्यति च।

**अमितशाहः**

केन्द्रीयः गृहमन्त्री अमितशाहः अद्य बिहारस्य त्रिदिवसीयां यात्रां प्रारब्धवान्। अररियायां जनसभां सम्बोधयन् श्रीशाहवर्यः अवदत् यत् नरेन्द्र-मोदी-सर्वकारः भारतीयभूमेः प्रत्येकं उत्कोचग्राहिणम् निष्कासयितुं प्रतिबद्धः अस्ति । गृहमन्त्री इत्यपि अवदत् यत् उत्कोचग्राहिणः मुक्त्याभियानं केवलं मतदातृ-सूच्यां नाम्नां निष्कासनं यावदेव सीमितं न भविष्यति अपितु देशात् अवैधप्रवेशस्य निर्मूलनार्थं विस्तृताभियानरूपेण अपि अस्य प्रवर्तनं भविष्यति।

**सर्वोच्चन्यायालयः.-एन्. सी. ई. आर्. टी. पुस्तकनिषेधम्**

सर्वोच्चन्यायालयेन न्यायपालिकायां भ्रष्टाचारविषये प्रक्षिप्ताध्याय-युक्तस्य एन. सी. ई. आर. टी. इत्यस्य अष्टम-कक्षायाः पुस्तकस्य सम्पूर्णः निषेधः कृतः अस्ति। सर्वोच्चन्यायालयः सर्वासां प्रकाशितप्रतीनाम् अभिग्रहणस्य आदेशं प्रायच्छत् , पुस्तकस्य डिजिटल-प्रपत्राणां निष्कासनम् अपि कर्तुम् आदेशम् अयच्छत् । न्यायालयः केन्द्र-राज्य-अधिकारिभ्यः तत्क्षणमेव तस्य निर्देशानाम् अनुपालनं कर्तुम् आदिशत्, यदि निर्देशानाम् केनापिरूपेण अवहेलनं भवति तर्हि गम्भीर-कार्याचरण-विषये च सञ्चेतनाम् अयच्छत् । सर्वोच्चन्यायालयेन एन्. सी. ई. आर्. टी. इत्यस्य निर्देशकाय, विद्यालयशिक्षासचिवाय च कारणदर्शिका सञ्चेतना प्रदत्ता यस्मिन् तेन पृष्टं यत् उत्तरदायिनां विरुद्धं किमर्थं कार्याचरणं न करणीयम्।

**अन्नपूर्णादेवी-सम्मेलनम्**

केंद्रीय-महिला एवं बाल विकास-मंत्री अन्नपूर्णा-देवी अद्य उक्तवती यत् देशस्य सर्वत्र महिलानां कृते अवसराणां अधिकप्राप्तिः, आर्थिकस्वतन्त्रता च जीवनस्य उत्तमगुणवत्तां सुनिश्चेतुं महिला-नेतृत्वयुक्त-विकासः प्रशासनस्य नीतिगत-योजनायाः केन्द्रे अस्ति। नव-दिल्ल्याम् आयोजितस्य "सशक्त नारी–विकसित भारत" नाम्नः महिला-नेतृत्वसम्मेलनस्य उद्घाटन-सत्रं सम्बोधयन्ती सा इदमपि प्रोक्तवती। सा प्रधानमन्त्री मुद्रायोजना , स्टार्ट अप इंडिया तथा पी एम स्वनिधि योजना इत्यादीनां अनेकासां योजनानां विषये प्रकाशितवती। एताभिः योजनाभिः महिलाः आर्थिकरूपेण सशक्ताः अभवन् तथा तासां आत्मविश्वासः आत्मनिर्भरता च अपि संवर्धिता।

**क्रिकेट्**

आई सी सी विंशतिः प्रति विंशतिः विश्व-चषक-क्रिकेट-स्पर्धा-मालिकायां अद्य भारतीय दलम् जिम्बाब्वे-दलम् सम्मुखीकरिष्यति। इयं स्पर्धा चेन्नईनगरस्य एम.ए. चिदंबरम -क्रीड़ांगणे भविष्यति। स्पर्धेयं सायं सप्तवादने आरप्स्यते।

**।। इति वार्ता: ।।**